International Journal of Sanskrit Research 2024; 10(4): 153-154

International Journal of
Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2024; 10(4): 153-154
© 2024 IJSR
www.anantaajournal.com
Received: 13-05-2024
Accepted: 15-06-2024

**फूल चन्द चौधरी**
शोधार्थी, व्याकरणे, जरारासंविवि,
जयपुरम्, राजस्थान, भारत

**Corresponding Author:**
**फूल चन्द चौधरी**
शोधार्थी, व्याकरणे, जरारासंविवि,
जयपुरम्, राजस्थान, भारत

# ।। सारस्वतप्रक्रिया प्रक्रियाकारश्च ।।

## फूल चन्द चौधरी

## प्रस्तावना

ऐन्द्रं चान्द्रं काशकृत्स्नं जैनेन्द्रं शाटकायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम्।।

श्लोकेनानेन अष्टानां व्याकरणप्रभेदानां पुष्टिः जायते। सर्वजनविदितं यत् व्याकरणशास्त्रभेदेष्वेकं सारस्वतं व्याकरणम्। सरस्वत्या प्रणीतं सारस्वतम्। सारस्वतव्याकरणविषये एका किंवदन्ती श्रूयते यत् अनुभूतिस्वरूपाचार्येण अशुद्धशब्दस्य साधुत्वज्ञानाय भगवत्याः सरस्वत्या उपासना कृता। श्रद्धया प्रसन्ना सत्या भगवत्या सरस्वतिना सप्तशतानि सूत्राणि प्रदत्तानि। यैः सूत्रैः व्याकरणस्य रचना जाता तत् सारस्वतं व्याकरणमिति प्रसिद्धम्। व्याकरणस्यास्य प्रमुखा अष्टादशटीकाः सन्ति तास्वेका पुञ्जराजी टीका। पुञ्जराजी नाम विदुषा पुञ्जराजेन विरचितेयंटीका। ग्रन्थकारेण स्वटीकाग्रन्थे यत्र तत्र प्रमाणी कृतं यत् “पुञ्जराजनिर्मितायां सारस्वतस्य टीकायां संज्ञाप्रकरणमेतत् चतुरचमत्कारि निवृत्तम्।[1]” पुनः “इति श्रीपुञ्जराजेन विद्वदनुजभानुना सारस्वतस्य टीकायां स्वरसन्धिर्निरूपिता।[2]” अनयारीत्या ग्रन्थादौ मङ्गलाचरणेऽपि ग्रन्थकारेण वर्णितम्। यथा -

वाग्देवतायाश्चरणारविन्दमानन्दसान्द्रे हृदि सन्निधाय।
श्रीपुञ्जराजः कुरुते मनोज्ञां सारस्वतव्याकरणस्य टीकाम्।।[3]

मङ्गलश्लोकेनानेन श्रीपुञ्जराजनिर्मिता टीकेति वर्णितम्। सारस्वतव्याकरणस्य अस्याः टीकायाः “प्रक्रिया टीका” इति नामकरणं जातम्। विविधप्रान्तेभ्यः विविधसंस्थानेभ्यः पुञ्जराजलिखिताःएकादशहस्तलेखाः संप्राप्ताः सन्ति। येषु केचन लेखेषु सम्पूर्णपाठः विद्यते, कतिपयाः हस्तलेखाः अपूर्णा अपि सन्ति। प्रक्रियाटीकायाः रचनाकारः श्रीपुञ्जराजः मालवाप्रान्तीयोऽभवत्। खिलजीवंशेन सह सम्बन्धवशात् ग्रन्थकारस्य कालः सं. १५५० विद्वद्भिः निश्चितम्। महोदयोऽयं मालवाप्रान्तस्य श्रीमालब्राह्मणपरिवारे जनिमलभत। यथा :- “इति श्री श्रीमालान्वयतिलकपुञ्जक्षितिसुभुजा विशेषव्याख्यानप्रवणहृदयाह्लादिवचसा।” पङ्क्त्याऽनया ग्रन्थकारस्य विशिष्टव्याख्यानदक्षतायाः अनुमानमपि भवति। सामान्यबालकानिव पुञ्जराजस्य बाल्यकालं मात्र क्रीडायां मातुरङ्के वा न, अपितु विविधगुरोः सानिध्ये व्यतीतम्। भिन्नेभ्यः स्थानेभ्यः ज्ञानमर्जयित्वा

स्वबुद्ध्या शास्त्रसंशोधनं चकार।

शास्त्राभ्यासेन तीक्ष्णधीवान् ग्रन्थकारोऽयं विविधग्रन्थान् रचितवान्। पुनश्च स्वबुद्धिचातुर्येण दूरदर्शितायाः प्रभावेण च राज्यसभायां स्वस्थानं निर्मितवान्। कथ्यते यत् –श्रीपुञ्जराजः मालवाप्रान्तस्य गयासुद्दीनखिलजीनाम्नः राज्ञः वित्तमन्त्री आसीत्।[4] निःस्वार्थभावेन पुञ्जराजः स्वकर्तव्यपालनमकरोत्। राजधनस्यसम्पूर्णावागमनस्य, धनसंचयनीतिनां, व्ययापव्ययमित्यादीनां सम्पूर्णगतिविधीनां सूक्ष्मनिरिक्षणेन राज्ञः कोषे वृद्धिमानयत्। तस्य राज्ञ एकः नासिरुद्दीननाम्नः पुत्रः भोगविलासे धनस्यातिव्ययमकरोत्। धनस्य मिथ्यापव्ययेन राज्ये विपत्तिः आगमिष्यतीति विचार्य पुञ्जराजः सम्पूर्णवृत्तान्तं राजानमकथयत्। पुञ्जराजस्य निःस्वार्थराजनिष्ठां दृष्ट्वा राजा तं प्रशंसति स्म, परन्तु राजकुमारः पुञ्जराजस्य कृत्येनानेन खिन्नो भूत्वा शत्रुवदाचरति स्म। स्वापमानेन रुष्टो सः राजपुत्रः निरन्तरं प्रतिशोधज्वालायां प्राज्वलत्।

प्रतिशोधान्धो येन केन प्रकारेण पुञ्जराजस्याहितं मिच्छति स्म, परं राजनिष्ठावान् कोषरक्षकस्य (पुञ्जराजस्य) किमप्यहितं कर्तुं असमर्थोऽभवत्। निरन्तरपराजयेन पीडितो राजपुत्र अन्ते पुञ्जराजस्य मृत्युषड्यन्त्रमरचयत्। पुञ्जराजस्य वधेन राज्ये सर्वत्र निन्दामप्राप्नोत्, पुनः सः राक्षसः राज्यं त्यक्त्वाअन्यदेशे अगमत्।[5] प्रकारेणानेन सामान्यवर्गात् राज्यस्य वित्तमन्त्रीपर्यन्ता ग्रन्थकारस्य जीवनयात्रा ऐतिकासिकग्रन्थेषु वर्णिता। पुञ्जराजः विविधशास्त्राभ्यासेन ज्ञानमर्जयित्वा लोकोपकाराय ग्रन्थरचनामपि कृतवान्। न मात्र व्याकरणशास्त्रेऽपितु साहित्यशास्त्रेऽपि पुञ्जराजः स्वावदानमददात्। व्याकरणशास्त्रस्य प्रक्रियाटीकानन्तरं साहित्यशास्त्रे अलङ्कारमाधारीकृत्य शिशुप्रबोधं, ध्वनिश्चाश्रित्य ध्वनिप्रबोधाख्यौग्रन्थौअरचयत्।[6] ग्रन्थकारस्य ग्रन्थरचनायां सर्वाधिकं प्रसिद्धियुक्तं ग्रन्थं “प्रक्रिया टीका” वर्तते। अस्यां टीकायामतिसारल्येन बालधीमनुसृत्य उदाहरणानि प्रदत्तानि सन्ति। एषा ‘प्रक्रिया टीका’ सरलभाषायां पुनश्च विस्तारराहित्येन सूत्रार्थान् प्रकाशयति। सारस्वतप्रक्रियायां कुतः शब्दबाहुल्यं कुतश्चार्थ बाहुल्यमेतत् सर्वमपि वृत्तान्तंपुञ्जराजः सोदाहरणं प्रतिपादयति। प्रायः सारस्वतव्याकरणस्य बहव्यः टीकाः सन्ति परन्तु तासु टीकासु यन्न कथितं तद्वृत्तं टीकैषा वर्णयति। उदाहरणरूपेण टीकायां वर्णितानि ह्रस्वदीर्घप्लुताधारितानि कानिचन सूत्राणियथा -

ह्रस्वादीनामवान्तरभेदानाह – ‘एकमात्रो भवेध्रस्वो.. त्वर्धमात्रकम्।।’ एषामन्येऽप्युदात्तादिभेदा इति। एषां ह्रस्वादीनामन्येऽप्युदात्तादयो भेदाः सन्तीति शेषः। तत्स्वरूपमाह – ‘उच्चैरुपलभ्यमान उदात्तः’ उच्चैः स्थाने उच्चार्यमाणतया उपलभ्यमानोवर्ण उदात्तः। ‘नीचैरनुदात्तः’ नीचैः स्थाने उच्चार्यमाणतया उपलभ्यमानोऽनुदात्तः। ‘समाहारः स्वरितः’ उदात्तानुदात्तयोः समावृत्तिः समाहारः स्वरित इत्युच्यते। क्वचित् ‘समवृत्या स्वरित’ इति पठन्ति। तथा तु ह्रस्त (ह्रस्व) स्वरे समावृत्तिः ग्राह्या। अत्र उच्चतानीचते तु इष्टस्थानापेक्षया ज्ञातव्ये, अन्यथा अतिप्रसङ्गदोषो भवति।[7]

ए ऐ ओ औ…। पञ्चपदं सूत्रं पूर्ववत्। अनेन प्रत्याहार ग्रहणाय वर्णाः परिगण्यन्ते। अत्र सूत्रस्य वाक्यत्वाद् विवक्षितत्वेन सन्धिः। छन्दस्त्वेन सिलोपः। अकारस्य इकारेण एकारेण ओकारेण च सन्धौ क्रमेण ए ऐ ओ औ भवन्ति इति सन्ध्यक्षरसंज्ञा त्वर्थाज्ज्ञेया।[8]

अनया रीत्या सम्पूर्णानामपि सारस्वतसूत्राणां सारल्यातिशयेन विस्तारराहित्येन वर्णनं प्रक्रियाटीकायां पुञ्जराजेन प्रतिपादितम्। ग्रन्थकारस्य प्रयत्नमिदं व्याकरणशास्त्रे विशिष्टावदानं वर्तते येन सामान्यधीमतां बालकानामत्र व्याकरणशास्त्रे सारल्येन प्रवेशो भविष्यतीति विशेषः।

।। जयतु संस्कृतम्।।

संदर्भ सूची


1. सारस्वतप्रक्रिया मूलपाठ
2. सारस्वतप्रक्रिया मूलपाठ
3. सारस्वतप्रक्रिया टीकायां मङ्गलाचरणम्
4. संस्कृतव्याकरणशास्त्र का इतिहास – पृष्ठ सं ७२८
5. संस्कृतव्याकरणशास्त्र का इतिहास – पृष्ठ सं ७२९
6. संस्कृतव्याकरणशास्त्र का संक्षिप्तइतिहास–२३९
7. सारस्वतप्रक्रिया मूलपाठ–संज्ञाप्रकरणम्
8. सारस्वतप्रक्रिया मूलपाठ–संज्ञाप्रकरणम्